श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ नक्षत्रमालास्तबकः पञ्चदशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ नक्षत्रमालास्तबकः पञ्चदशः ॥

आनन्दमैन्दिराः कुर्युरपाङ्गा यत्प्रसङ्गतः।
अश्विनीहस्तिसंपन्ना सम्पदुज्जृम्भते नृणाम्॥ **15.1** ॥

भगवति सुधाब्धिकन्ये
    भवतीं भूष्णुः प्रपद्येऽहम्।
परमाभरणीभूतां
    भुजान्तरे भोगिशैलेन्दोः॥ **15.2** ॥

निजशिरसि निदधदुच्चैः
    सम्पन्मय्यास्तवाम्ब सोदर्यम्।
अपि सकलविभवदायी हा
    वस्त्रीभूतकृत्तिको भिक्षुः॥ **15.3** ॥

तामसह्यभवतापशान्तये
    स्तौमि तामरसवासिनीमहम्।
वर्णयन्ति यदपाङ्गमालिकां
    वासुदेवनिलयाधिरोहिणीम्॥ **15.4** ॥

तव सुधांशुजयाभिमुखं मुखं
    मृगशिरोमणिदर्पमुषौ दृशौ।
विघटकं च वपुस्तटिदुन्नतेः
    भुवनमातरतो न तवोपमा॥ **15.5** ॥

वरुणालयेन्द्रतनये करुणार्द्राः
    तव लोकमातुरवलोकविशेषाः।
परितन्यमानदुरितं सततं माम्
    अधुना पुनन्तु मधुनाशनकान्ते॥ **15.6**॥

शापेन रोषणमुनेः शमितप्रभावः
    देवोत्तमो मधुजितो दयिते विषण्णः।
तन्वंस्तव स्तववचः स्तबकैः सपर्यां
    स्थाने विराजति पुनर्वसुरुद्रसेव्ये॥ **15.7**॥

निगमकथितमायुर्निस्तुलारोग्यभाग्यं
    निरवधिकविभूतिं नित्यहृद्यां च विद्याम्।
भगवति गुणपूर्तिं भासमानां च कीर्तिं
    बलिरिपुपदभक्तिं भेजुषां पुष्यसि त्वम्॥ **15.8**॥

शेषाचलाधीशाङ्काश्लेषाचला मोदोन्नतिः
    सैषा भवोन्मेषाब्धि संशोषावहा विश्वप्रसूः।
तोषाय नः कल्पेत दुर्दोषापहा यस्याः पदं
    भाषाशचीमुख्यद्युसद्योषा शिरोभूषायते॥ **15.9**॥

इहोपास्ते यस्ते चरणकमलद्वन्द्वममलं
    स पूज्यः स्वाराज्यं जननि कलयिष्यन्नविकलम्।
मघोनः साम्राज्यं मदनमथनस्यापि विभवं
    तृणप्रायं प्रायो गणयति पदं द्रौहिणमपि॥ **15.10**॥

आर्यसेवितमक्षयं फलमिष्टमार्यमतारकं
    यत्क्षणेन निजेक्षणेन मुदा ददाति सनातनम्।
तत् तटित्समधाम मङ्गलनाम तामरसालयं
    पालयत्विममानमत्सुरयौवतं परदैवतम्॥ **15.11**॥

एकेनाञ्जलिनैव कञ्जनिलये सर्वार्थमुर्वीतले
सन्दायाथ मुकुन्दमन्दिरगतिं संतन्वतीं त्वां विना।
मा रंस्तातिचले खले नृपकुले वागुत्तरा फल्गुनी -
त्याशासेऽहमहर्निशं तदितरद्याचामि नो जातुचित्॥ **15.12** ॥

क्षिपतु क्षिप्रमनल्पमप्रतिहतस्तापत्रयं मामकं
भवदावाग्निभयावहस्तव कृपावीक्षासुधानिर्झरः।
व्यधयन् साधुकदम्बमम्ब विहितप्रौढागमव्याहतिः
शशिनः सोदरि हानिदाघविभवः शान्तिं यतो विन्दति॥ **15.13** ॥

लोके पाकारिमेके विरचितयजनश्रेणयः प्रीणयन्ते
केचित् त्रासापनुत्त्यै विदधति नृहरेर्योगिवर्याः सपर्याम्।
अन्ये पाथोधिकन्ये हरपरिचरणं कुर्वते सर्वदेह
त्वामेवामेयरूपां मनसि वयममी सर्वदा भावयामः॥ **15.14** ॥

मयि सर्वापकृतिक्षमेऽपि कलयस्वातीव शीतां दयां
हरिकान्ते भुवनोपकारनिरतेष्वन्येषु धन्येष्विव।
पनसाम्रादिमहीरुहेषु ददती भूरीणि वारीणि सा
विषवृक्षेऽपि मुहुः प्रवर्षति न किं विश्वाम्ब कादम्बिनी॥ **15.15** ॥

पूर्णं वर्णयितुं तवाम्ब निगमा न प्राभवन् प्राभवं
यस्याः स्वर्गणिका मुदं विदधते दास्येन लास्येन च।
वाणी सा च विशाखदन्तिमुखयोर्माताऽपि जातादरे
धन्ये चामरवीजनं रचयते धत्ते कलाचीं शची॥ **15.16** ॥

बहुतरमनूराधारयता मुखैरखिलश्रुतीः
नळिनजनुषा निर्मातुमहो यदम्ब न शक्यते।
कथमिह तव स्तोत्रे कवयः स्वयं वयमिन्दिरे
जगति शिशवोऽशक्यार्थकृतोऽथ वा जननीमुदे॥ **15.17** ॥

त्रस्यत्ताताभिहितवचनत्राणधर्माय सीते
　　ज्येष्ठैकार्हं रघुपरिबृढे राज्यमुत्सृज्य याते।
विश्वं त्रातुं त्वमनुचलिता वीरमेनं हि नो चेत्
　　कस्माद्भस्मीभवतु जगतां कण्टकः पङ्क्तिकण्ठः॥ **15.18** ॥

द्विषच्चमूलयेच्छया तवाङ्घ्रिपद्ममिन्दिरे
　　स्फुरत्सरोजमन्दिरे सुराः पुरा ववन्दिरे।
तदेव संपदे वयं निरापदे तमोभिदे
　　भजामहे भुजायुगीयुजा नतेन मौलिना॥ **15.19** ॥

कलितनियमपूर्वाषाढकाषायचेला
　　यतसकलहृषीका यद्यतीन्द्रा विशन्ति।
तदपि भजति धाम न्यस्य भारं त्वदङ्घ्रौ
　　मम जननि नृपाशो मादृशो बालिशोऽपि॥ **15.20** ॥

सारापदानशतमोदितविश्वदेव -
　　तारापतिस्थमपि भानुसुतेन राज्यम्।
त्वत्प्राप्तिकार्यसहकारिगिरैव लब्धं
　　कार्योद्यमोऽपि महतां कमले शिवाय॥ **15.21** ॥

दुरितं विषह्य निखिलं दयानिधे
　　परिपात्वकिञ्चनजनं भवानिति।
जगदुद्भवादिनिरतस्य शार्ङ्गिणः
　　श्रवणेऽभिधेहि रहसि स्वयं रमे॥ **15.22** ॥

अशक्तोऽस्मि दुःसाधनिष्ठासहस्रे -
　　ष्वहं कर्मबोधाद्युपायान्तरेषु।
अतस्तावकीने सुरद्रोरनूने
　　पदे लोकमातः प्रपद्येऽतिभीतः॥ **15.23** ॥

त्वत्परिग्रहजुषं द्विषन् रमे
    क्षीयते बहुसहायवानपि।
तन्निदर्शनमपास्तवारिजः
    चन्द्रमाः शतभिषङ्निषेवितः॥ **15.24** ॥

भगवति यस्य भवद्गुण -
    कीर्तनकं प्रोष्ठपदमास्यम्।
भवति हि जगति गतिस्त -
    च्चरणाम्बुजरेणुरस्माकम्॥ **15.25** ॥

त्वत्पदमरविन्दगृहे
    वन्दन्ते हन्त जन्तवो भुवि ये।
भुवनोत्तरभाद्रपद
    क्षुण्णममीषां गृहद्वारम्॥ **15.26** ॥

शिशिरेऽवतीर्य सिन्धौ
    साकं शीतांशुना पद्मे।
करुणार्द्रे कान्तहृदि
    स्थास्नुर्मुष्णासि तापं मे॥ **15.27** ॥

संग्रथ्य चित्रैः पदरत्नखण्डैः
    समर्पिता दास्यजुषा मयैषा।
नक्षत्रमाला नदराजकन्ये
    हृद्या त्वदीये हृदये चकास्तु॥ **15.28** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे
नक्षत्रमालास्तबकः पञ्चदशः॥